National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(62): 157-159
© 2025 NJHSR
www.sanskritarticle.com

**डा. नीरजभारद्वाजः**
बीशा, कण्डाघाटः,
सोलनम्, हि.प्र. -173234

**Correspondence:**
**डा. नीरजभारद्वाजः**
बीशा, कण्डाघाटः,
सोलनम्, हि.प्र.- 173234

# रोगनिर्धारणतत्वमीमांसा

**डा. नीरजभारद्वाजः**

रुज्यते अनेन इति रोगः। तत्र रुज् धातोः घञ् प्रत्यये कृते सति निष्पन्नोऽयं रोगशब्दः। चरकसंहितायान्तु रोगशब्दस्य विषये उक्तं यत् **तत्र व्याधिरामयो गद आतङ्को यक्ष्माज्वरोविकाररोगः इत्यर्थान्तरम्**[1] इति। आयुर्वेदस्य त्रिदोषसिद्धान्ताधारेण त्रिविधाः प्रकृतयः मानवशरीरे वर्त्तन्ते। एतेषां साम्यभावेन मानवो निरोगी भवति परन्त्वेतेषां विषमभावत्वेन शरीरे विभिन्नाः रोगाः समुत्पद्यन्ते।

अस्माकं शरीरे मनसि च जायमानो विकारो योऽस्मान् केनापि प्रकारेण दुःखं प्रयच्छतीति रोगनाम्ना ज्ञायते।[2] आयुर्वेदे मूलरूपेण रोगस्य कारणद्वयं प्राप्यते, **प्रथमन्तु दोषप्रकोपः अपरश्च कर्मप्रकोपः**।

**कर्मप्रकोपेण कदाचिदेके दोषप्रकोपेण भवन्ति चान्ये।**
**तथापरे प्राणिषु कर्मदोषप्रकोपजाः कायमनोविकाराः।।**[3]

जन्मान्तरकृतकर्मणानुसारेणास्माकं शरीरे रोगाः उत्पद्यन्ते, इदानीं जिज्ञासा भवति यज्जन्मान्तरकृतं पापकर्म नाम किम्? भारतीयदर्शनानुसारेण आत्मा अमरः अविनाशी चास्ति। परन्तु कर्मजनितबन्धनत्वादियमनेकानेकयोर्निं प्राप्नोति। कर्मबन्धादेव इदं परतन्त्रं विनाशी च प्रतीयते। वैदिकदर्शने जन्मान्तरीयकर्मणः त्रयः भेदाः वर्णिताः सन्ति सञ्चितम्, प्रारब्धम्, क्रियमाणञ्च। तत्र जन्मान्तरकृतं कर्म सञ्चितकर्म। सञ्चितकर्मणः यस्य भागस्य फलं प्राप्यते तत् प्रारब्धकर्म। सम्प्रति विद्यमानकर्म क्रियमाणकर्मेति। तत्र पूर्वजन्मोपार्जितानि अशुभकर्माण्येव इह जन्मनि व्याधिरूपेण फलितानि भवन्ति। यथोक्तं प्रश्नमार्गे -

**जन्मान्तरकृतं पापं व्याधिरूपेण जायते।**
**तच्छान्तिरौषधैर्दानैर्जपहोमार्चनादिभिः॥**[4]

यथा दीपकः अन्धकारस्थ-पदार्थानां बोधं कारयति तथैव ज्योतिषशास्त्रमपि जन्मान्तरे कृतकर्मणां परिणामानभिव्यनक्ति। अतः जन्मजन्मान्तरे कृताशुभकर्मभिरुत्पन्नरोगाणां विचारार्थं ज्योतिषशास्त्रं महत्त्वपूर्णां भूमिकां निर्वहति। वस्तुतः पूर्वाशुभकर्मजन्यप्रभावमूलकः अशुभफलप्रदग्रहो जातकस्य प्रकृतिं खण्डयति, तेनाशुभफलप्रदग्रहकालविशेषे कारकग्रहसम्बन्धेन विभिन्नरोगाः दोषाश्च प्रवर्त्तन्ते। आधानकालाज्जन्मपर्यन्तं जातकस्य मूलप्रकृतिः निर्मीयते। तत्र यादृशी मूलप्रकृतिर्भवति तदनुरोधेनानुकूलत्वेन तात्कालिकप्रभावेन शुभत्वं प्रतिकूलत्वेनाशुभत्वं च ज्ञेयम्।
शरीरस्य रक्षकतन्त्रं यादृशं स्यात्तदनुरोधेनैव जातकोपरि विभिन्नप्रभावाः दोषादयो न्यूनाधिकत्वेन पतन्ति। रोगोपचारतः पूर्वं रोगिणः आयुचिन्तनमावश्यकं भवतीत्युच्यते-

**आयुः पूर्वं परिक्षेत पश्चाल्लक्षणमादिशेत्।**
**अनायुषान्तु मर्त्यानां लक्षणैः किं प्रयोजनम्॥**[5]

एवं प्रकारेण जातकस्य जन्मजन्मान्तरकृतकर्मणां प्रारब्धकर्मणां वा वर्तमाने (इह जन्मनि) कृतकर्मणां कारणादेव (कर्मकृतप्रकोपकारणादेव) रोगोत्पत्तिः ज्योतिषशास्त्राधारेण ज्ञातव्या। अर्थात् जन्म-जन्मान्तराणामशुभकर्मणां कारणाद्वर्त्तमानेऽनुचिताहाराविहारावपि चरकसंहितायां रोगोत्पत्तेः कारणं मन्यते। अनुचिताहारविहारयोः अभिप्रायोऽत्र वर्त्तते यद्यस्मिन् ऋतौ यस्मिन् काले (प्रातःकाले, -

मध्याह्ने, सांये रात्रौ वा) आयुर्वेदे यानि-यानि भोज्यवस्तूनि निर्दिष्टानि सन्ति, तानि वस्तून्यतिरिच्य स्वेच्छया एव भुञ्जते तदा स आहारः अनुचितो भवति।

ऋतुपरिवर्तनानुरूपं यद्याहारविहारौ क्रियेताम्, तदा पूर्वोक्ततथ्येभ्यः निवृत्तिर्भवितुमर्हति। एवं सर्वं कृत्वापि यदि पुनः रोगो भवेत्तदा रोगमिमं कर्मजन्यं जानियात्।[6] परञ्चायुर्वेदस्यानेन तर्केण ज्योतिषशास्त्रं भिद्यते। यतो हि कश्चन जातकः समयानुगुणमाहारविहारावकृत्वापि स्वस्थो भवति चेत्तस्य जन्मकुण्डल्यां ग्रहयोगः, दशाफलं, गोचरप्रभावश्च शुभफलदायको भवेत्। अपरे जनाः समयानुगुणमाहारविहारौ कृत्वापि जन्मकालिकाशुभग्रहप्रभावात् रूग्णाः भवन्ति।

**रोगोप्रकाराः-**

रोगाः **निजागन्तुक**भेदाभ्यां द्विधाः सन्ति। निजरोगाः पुनः शारीरिकमानसिकभेदाभ्यां द्विविधाः भवन्ति। आगन्तुकरोगाः अपि दृष्टनिमित्तजन्य-अदृष्टनिमित्तजन्यभेदाभ्यां द्विप्रकारकाः वर्त्तन्ते। सूर्यादीनां प्रभावेण विशिष्टाङ्गेषु रोगोद्भवत्वं, त्रिदोषविचारेण रोगोत्पत्तिपूर्वकं रोगाणां विभिन्नभेदाश्च प्रश्नमार्गे[7] प्रतिपादितास्सन्ति।

**शारीरिकरोगाः -**

एते रोगाः प्रायः वातपित्तकफविकारोत्पन्नाः भवन्ति। यथोक्तं प्रश्नमार्गे[8]-

**वातपित्तकफोद्भूताः पृथक्संसर्गजास्तथा।**
**सन्निपातभावाश्चैते शरीरे कीर्तिता गदाः॥**[8]

**मानसिकरोगाः-**

ये रोगाः खलु हर्षक्रोधशोकादिभ्यः उत्पन्नाः भवन्ति ते मानसिकरोगाः भवन्ति। एते अष्टमेश चतुर्थेशयोर्दृष्टियुति-सम्बन्धवशादुत्पद्यन्ते । यथोक्तम् -

**क्रोधसाध्वसशोकादिवेगजातास्तु मानसाः**
**ज्ञेया रन्ध्रमनोथमिथो योगक्षणादिभिः॥**[9]

**दृष्टनिमित्तजन्यरोगाः-**

एते रोगाः मारणमोहनोच्चाटनाद्यभिचारघातेभ्यः समुत्पद्यन्ते। वस्तुतः षष्ठभाव-षष्ठभावकारक-षष्ठेश-षष्ठस्थग्रह-षष्ठभावद्रष्टृग्रहैः षष्ठाष्टमेशसम्बन्धेन च शापाद्युक्तनिमित्ताद्रोगाः जायन्ते। यथा हि -

**शापाभिचारघातादिजाताः दृष्टनिमित्तजाः।**
**ज्ञेया षष्ठतदीशाभ्यां तद्द्रष्टा तद्गतेन वा ॥**
**रन्ध्रेषष्ठसम्बन्धे शापाद्याः प्रबलाश्च ते।**[10]

**अदृष्टनिमित्तजन्यरोगाः –**

वस्तुतः पूर्वजन्मकृतकर्मवशादज्ञातबाधकग्रहेभ्योऽज्ञातकारणीभूताः एते अरिष्टजन्यरोगाः उत्पद्यन्ते। यथा हि - **अदृष्टहेतुजाः ज्ञेयाः बाधकग्रहसम्भवाः।**

सञ्चितपापकर्मणः फलमेव जातको रोगरूपेणानुभवतीति पूर्वमेव प्रतिपादितम्। कर्मणः फलव्यञ्जकमिदं शास्त्रं ग्रहाणां स्थिति-युत्यादीनां कर्मफलपरिपाककालं, स्वरूपं, स्थानञ्च प्रकटयति। पूर्वजन्मन्याचरितकर्मणः फलमेवरोगस्य कारणमिति पूर्वमेव प्रतिपादितम्। यथा कथितमस्ति -

**जन्मान्तरकृतं पापं व्याधिरूपेण जायते।**
**कर्मफलं शुभाशुभमध्यमा नाम्ना त्रिविधं भवति।**
**त्रिविधं प्राणिनां कर्म नृणां चैव स्वभावजम्।**
**अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम्॥**[11]

अशुभकर्मरताः पाताले, शुभकर्मरताः स्वर्गे एवं मध्यमकर्मरताः मृत्युलोके जन्म लभन्ते, तथा च स्वसञ्चितकर्मणां फलमनुभवन्ति। यथोक्तं कर्मविपाकसंहितायाम् –

**अनिष्टं नागलोके च नरके विविधे तथा ।**
**इष्टं स्वर्गे फलं देवी मिश्रं मर्त्ये प्रजापते ॥**[12]

एवं प्रकारेण पूर्वजन्मार्जितशुभाशुभकर्मवशात् इह जन्मनि लोकाः कीदृशं फलमाप्नुवन्तीति प्रतिपाद्यते-

➢ ब्राह्मणहत्या, गुरुद्वेषः, सूर्यचन्द्रमसोः ग्रहणकाले स्त्रीसंभोगो राजयक्ष्माख्यस्य रोगस्य कारकाः वर्त्तन्ते। यथोक्तं प्रश्नमार्गे –

**हेतुर्ब्राह्मणहिंसनं गुरूजनद्वेषोऽन्यदोषोद्भवम् ।**
**स्त्रीसङ्गो ग्रहणादिपुण्यसमये स्याद्राजयक्ष्मोद्भवः॥**[13]

➢ अन्नस्य चौर्यं कृशतायाः कारको वर्त्तते। यथोक्तं प्रश्नमार्गे -

**कार्श्यहेतुरिहान्नस्य चौर्यं हि स्मृतिषूदितम्।**[14]

➢ ब्राह्मणहत्या, गुरोर्भार्यया सह सम्भोगः, निन्दनीयाचरणम्, द्वेषाद्गरलवितरणञ्च कुष्ठरोगस्य कारणानि वर्त्तन्ते। यथोक्तं प्रश्नमार्गे-

**हिंसा विप्रस्य भार्यागमनमपि गुरोर्दुश्चिकित्साप्रयोगो।**
**विश्वस्ते पुंसि द्वेषाद्गरलवितरणं कुष्ठरोगस्य हेतुः ।।**[15]

➢ कांस्य-कार्पास-लवण-वस्त्राणाञ्चापरहणं श्वेतकुष्ठस्य कारको वर्त्तते । यथोक्तं प्रश्नमार्गे - **कांस्यकार्पासलवणवासोहरणसंयुतम्।**[16]

➢ नागहत्या, सर्पहत्या विसर्परोगस्य कारकाः वर्त्तन्ते।

**विसर्पहेतुः खलु सर्पहिंसा सर्पेण हिंसाञ्च परस्य विधात् ।**[17]

➢ ब्राह्मणदेवयोर्धनस्य हरणम्, अपथ्यभोजनञ्च पाण्डुरोगस्य कारकौ वर्त्तेते। यथोक्तं प्रश्नमार्गे - **देवानां ब्राह्मणानां धनहरणम-पथ्याशनम्पाण्डुहेतुः।**[18]

➢ कस्यचित् दन्तौष्ठयोर्भञ्जनं, गुरोराज्ञाया उल्लङ्घनम्, कटुभाषणञ्च मुखारोगाणां कारकाः वर्त्तन्ते ।

**औष्ठच्छेदनदन्तभङ्गरसनाच्छेदाः परेषां गुरौ ।**
**वाणी वा पुरुषानृतं च वचनं स्यात्कूटसाक्षित्वयुक् ॥**[19]

➢ ब्राह्मणविद्वदन्धकानां द्रव्यहरणं, पशुनां हननं, अर्शरोगस्य (बवासीर) कारकाः वर्त्तन्ते ।

**द्विजविबुधनानामन्धसां चापहारो गमनमथ वधूनाम्चोपरागा-दिकाले । हननमपि पशूनामर्शसां हेतुरुक्तः प्रशमकृदमुष्य-स्वर्णधेनुप्रदानम् ॥**[20]

➢ कृतघ्नता, परस्त्रीणां दर्शनम्, परमनुष्यानां चक्षोर्भञ्जनञ्च नेत्ररोगाणां कारकाः वर्त्तन्ते।

**दृग्व्याधेस्तु कृतघ्नताऽन्यवनितासन्दर्शनं छद्मना ।**
**चान्यस्यक्षितिनाशनं खलु नृणां हेतुस्तु तच्छान्तये ॥**[21]

➢ गवां नेत्रभञ्जनं निशान्धरोगस्य कारकाः वर्त्तते। **नक्तान्धस्य तु हेतुः स्याद्गवां नयननाशनम्।**[22]

➢ गुरोरपमानं, कटुभाषणं, रसनाच्छेदनञ्च रसनासम्बन्धि-रोगस्य कारकाः वर्त्तन्ते

**जिह्वारोगस्य हेतुर्गुरुषु परुषवाग्भाषणञ्चानृतानाम् ।**
**दुःखाधानम्परेषामपि खलु रसनाच्छेदनं चास्य दानम् ।।**[23]

➢ सभ्यजनानां निन्दा, मातृपितृभ्यां द्वेषः, अन्नस्यापहृतिश्च वातरोगस्य कारकाः वर्त्तन्ते ।

**निन्दा सभ्यजनेषु तातजननीद्वेषो गुरुद्वेषणम् ।**
**चान्नस्यापहृतिः प्रभञ्जनरुजो हेतुस्तु तच्छान्तये ।।**[24]

➢ गुरुं प्रति वैरं, इर्ष्याद्विषादयो गुल्मरोगस्य कारकाः वर्त्तन्ते । यथोक्तं प्रश्नमार्गे - **हेतुर्गुल्मगदस्य वैरमधिकं निर्बन्धनं वा गुरौ चासूयान्नहृतिश्च ।**[25]

➢ तपसी-पशु-कन्या-गुरुपत्नी-विधवाभिः सह सम्भोगः, गुरुं प्रति द्वेषः, सुवर्णस्यापहरणं, हृत्पीडनञ्च प्रमेहरोगस्य कारकाः वर्त्तन्ते। माताश्वश्रुभ्रातुभार्याभिः सह सम्भोगः मधुमेहस्य कारकाः वर्त्तन्ते। यथोक्तं प्रश्नमार्गे -

**तापस्याः पशुकन्यकागुरुजनस्त्रीनिर्धवानां गतिः ।**
**विद्वेषो गुरुषु द्विजस्य हरणं हेम्नोऽन्यहृत्पीडनम् ॥**
**एतत्सर्वमिह प्रमेहकृदिदं मातृष्वसृ भ्रातृवधू ।**
**सम्भोगयुतं सुरेक्षुमधुमेहानां क्रमात्कारणम् ॥**[26]

➢ स्वाग्रजानामवज्ञाः, गुरोर्भार्यया सह सम्भोगश्च भगन्दररोगस्य कारकाः वर्त्तन्ते।

**आज्ञोल्लङ्घनमात्मदेशिकजनस्वाम्यादिकानां गुरु ।**
**स्त्रीसङ्गं च भगन्दरस्य शमनायैतस्य देयम्पुनः ।।**[27]

➢फलानामपहरणं विद्रधिरोगस्य (अर्बुदरोगस्य) कारको वर्त्तते।

**फलापहरणम्प्रोक्तं नृणां विद्रधिकारणम् ।**[28]

➢ अश्वत्थाद्युत्तमवृक्षाणां छेदनं, गवां हननं श्वेतरक्तमयतारोगस्य (शोणितार्बुदरोगस्य) कारकाः वर्त्तन्ते। **अश्वत्थपूर्वोत्तमभूरुहाणां छेदो गवां वा हननं तथैव।**[29]

➢ सार्वजनिकसम्पत्त्यापहरणं कण्ठरोगस्य कारको वर्त्तते। **गणस्वहरणं नृणां कण्ठरोगस्य कारणम्।**[30]

➢ गुरुहत्या, पतिहत्याश्चापस्माररोगस्य कारकाः वर्त्तन्ते। **गुरोर्वधः स्वामिवधश्च नृणां भवेदपस्मारकृदत्र कार्याः।**[31]

➢ गुरोर्भार्यया सह सम्भोगो दाहरोगस्य कारको वर्त्तते। **दाहस्य हेतुरुदितं गुरुस्त्रीगमनादिकम्।**[32]

➢ शाकादीनामपहरणं, विश्वासघातः, परजनानां हत्या, वृक्षाणां छेदनञ्च व्रणरोगस्य कारकाः वर्त्तन्ते। **शाकादिचौर्यम्परवाग्विघातो वधः परस्याऽनुचिताङ्गनाप्तिः।**[33]

➢ विदुषां विश्वासहननमरुचिरोगस्य कारको वर्त्तते। **हेतुरश्रद्धया दानमरुचेश्छर्दिकारणम्।**[34]

➢ यज्ञभङ्गः आन्त्रवृद्धे कारको वर्त्तते। **परैरारभ्यमाणस्य यागस्य विहतिर्भवेत्।**[35]

एवं प्रकारेण रोगाणामुत्पत्तौ त्रिदोषास्तु कारणभूताः भवन्त्येव किञ्च सञ्चितपापकर्मणः फलमपि जातको रोगरूपेणानुभवतीति अत्र प्रतिपादितम्। अतः कर्मणः फलव्यञ्जकमिदं शास्त्रं ग्रहाणां स्थितियुत्यादीनां कर्मफलपरिपाककालं, स्वरूपं, स्थानञ्च प्रकट-यति। अतः सत्येवोक्तं वराहमिहिराचार्येण-

**यदुपचितमन्यजन्मनि शुभाऽशुभं तस्य कर्मणः पंक्तिम्।**
**व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव।।**[36]

**सन्दर्भ**


1. चरकसंहितानिदानम्, १.४
2. ज्योतिषशास्त्र में रोग विचार, पृष्ठसङ्ख्या ९
3. वीरसिंहावलोकः, ज्वराधिकारः श्लो.१९
4. प्रश्नमार्गः अ.१३, श्लो.२९
5. प्रश्नमार्गः अ.९, श्लो.३
6. सुश्रुतसंहिता, ६.४०-६२
7. प्रश्न मार्ग अ.१२ श्लो. १७-१९
8. प्रश्न मार्ग अ. १२ श्लो. १७-१९
9. प्रश्न मार्ग अ. १२ श्लो.२२
10. प्रश्न मार्ग अ. १२ श्लो.२३-२४
11. कर्मविपाकसंहिता, अ.२, श्लो.२९
12. कर्मविपाकसंहिता, अ.२, श्लो.१७
13. प्रश्नमार्गः अ.२३, श्लो.२
14. प्रश्नमार्गः अ.२३, श्लो.३
15. प्रश्नमार्गः अ.२३, श्लो.४
16. प्रश्नमार्गः अ.२३, श्लो.५ द्वि. पादः
17. प्रश्नमार्गः अ.२३, श्लो.६ प्र. पादः
18. प्रश्नमार्गः अ.२३, श्लो.७ प्र. पादः
19. प्रश्नमार्गः अ.२३, श्लो.१० प्र. पादः
20. प्रश्नमार्गः अ.२३, श्लो.११ प्र. पादः
21. प्रश्नमार्गः अ.२३, श्लो.१२ प्र. पादः
22. प्रश्नमार्गः अ.२३, श्लो.१३ प्र. पादः
23. प्रश्नमार्गः अ.२३, श्लो.१५ प्र. पादः
24. प्रश्नमार्गः अ.२३, श्लो.१६ प्र. पादः
25. प्रश्नमार्गः अ.२३, श्लो.१८ प्र. पादः
26. प्रश्नमार्गः अ.२३, श्लो.१९
27. प्रश्नमार्गः अ.२३, श्लो.२३ प्र. पादः
28. प्रश्नमार्गः अ.२३, श्लो.२४ प्र. पादः
29. प्रश्नमार्गः अ.२३, श्लो.२७ प्र. पादः
30. प्रश्नमार्गः अ.२३, श्लो.२५ प्र. पादः
31. प्रश्नमार्गः अ.२३, श्लो.२८ प्र. पादः
32. प्रश्नमार्गः अ.२३, श्लो.३१ प्र. पादः
33. प्रश्नमार्गः अ.२३, श्लो.३२ प्र. पादः
34. प्रश्नमार्गः अ.२३, श्लो.३५ प्र. पादः
35. प्रश्नमार्गः अ.२३, श्लो.३६
36. लघुजातकम् अ.१, श्लो. ३